# Ramanuja Ashtottarashatanama Stotram

# રામાનુજાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Ramanuja Ashtottarashatanama Stotram

File name : rAmAnujAShTottarashatanAmastotram.itx

Category : deities_misc, stotra, gurudev, aShTottarashatanAma

Location : doc_deities_misc

Author : Rangarya

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Description-comments : Ramanuja Sampradaya. See corresponding nAmAvalI

Latest update : June 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 7, 2022

*sanskritdocuments.org*

Ramanuja Ashtottarashatanama Stotram

# રામાનુજાષ્ટોત્તરશતનામસ્તોત્રમ્

ૐ શ્રીમતે રામાનુજાય નમઃ ॥

ૐ રામાનુજઃ પુષ્કરાક્ષો યતીન્દ્રઃ કરુણાકરઃ ।
કાન્તિમત્યાત્મજઃ શ્રીમાઁલ્લીલામાનુષવિગ્રહઃ ॥ ૧॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ સર્વજ્ઞઃ સજ્જનપ્રિયઃ ।
હારીતગોત્રતિલકઃ શ્રીભૂતપુરપાલકઃ ॥ ૨॥

અનઘો ભક્તમન્દારઃ કેશવાનન્દવર્ધનઃ ।
કાઞ્ચીપૂર્ણપ્રિયસખઃ પ્રણતાર્તિવિનાશકઃ ॥ ૩॥

પુણ્યસઙ્કીર્તનઃ પુણ્યોબ્રહ્મરાક્ષસમોચકઃ ।
યાદવાપાદિતાપાર્થવૃક્ષચ્છેદકુઠારકઃ ॥ ૪॥

અમોઘો લક્ષ્મણમુનિઃ શારદાશોકનાશકઃ ।
નિરન્તરજનાજ્ઞાનવિમોચનવિચક્ષણઃ ॥ ૫॥

વેદાન્તદ્વયસારજ્ઞો વરદામ્બુપ્રદાયકઃ ।
પરાભિપ્રાયતત્ત્વજ્ઞો યામુનાઙ્ગુલિમોચકઃ ॥ ૬॥

દેવરાજકૃપાલબ્ધષટ્વાક્યાર્થમહોદધિઃ ।
પૂર્ણાર્યલબ્ધસન્મન્ત્રઃ શૌરિપાદાબ્જષટ્પદઃ ॥ ૭॥

ત્રિદણ્ડધારી બ્રહ્મજ્ઞો બ્રહ્મધ્યાનપરાયણઃ ।
રઙ્ગેશકૈઙ્કર્યરતો વિભૂતિદ્વયનાયકઃ ॥ ૮॥

ગોષ્ઠીપૂર્ણકૃપાલબ્ધમન્ત્રરાજપ્રકાશકઃ ।
વરરઙ્ગાનુકમ્પાત્તદ્રાવિડામ્નાયપારગઃ ॥ ૯॥

માલાધગયસુજ્ઞાત દ્રાવિડામ્નાયતત્ત્વધીઃ ।
ચતુસ્સપ્તતિશિષ્યાઢ્યઃ પઞ્ચાચાર્યપદાશ્રયઃ ॥ ૧૦॥

પ્રપીતવિષતીર્થામ્ભઃ પ્રકટીકૃતવૈભવઃ ।

પ્રણતાર્તિહરાચાર્યદત્તભિક્ષૈકભોજનઃ ॥ ૧૧॥

પવિત્રીકૃતકૂરેશ ભાગિનેયત્રિદણ્ડકઃ ।
કૂરેશદાસરથ્યાદિચરમાર્થપ્રદાયકઃ ॥ ૧૨॥

રઙ્ગેશવેઙ્કટેશાદિપ્રકટીકૃતવૈભવઃ ।
દેવરાજાર્ચનરતો મૂકમુક્તિપ્રદાયકઃ ॥ ૧૩॥

યજ્ઞમૂર્તિપ્રતિષ્ઠાતા મન્નાથો ધરણીધરઃ ।
વરદાચાર્યેસદ્ભક્તો યજ્ઞેશાર્તિવિનાશકઃ ॥ ૧૪॥

અનન્તાભીષ્ટફલદો વિઠ્ઠલેશપ્રપૂજિતઃ ।
શ્રીશૈલપૂર્ણકરુણાલબ્ધરામાયણાર્થકઃ ॥ ૧૫॥

પ્રપત્તિધર્મૈકરતો ગોવિન્દાર્યપ્રિયાનુજઃ ।
વ્યાસસૂત્રાર્થતત્ત્વજ્ઞો બોધાયનમતાનુગઃ ॥ ૧૬॥

શ્રીભાષ્યાદિમહાગ્રન્થકારકઃ કલિનાશનઃ ।
અદ્વૈતમતવિચ્છેત્તા વિશિષ્ટાદ્વૈતપારગઃ ॥ ૧૭॥

કુરઙ્ગનગરીપૂર્ણમન્ત્રરત્નોપદેશકઃ ।
વિનાશિતાખિલમતશ્શેષીકૃતરમાપતિઃ ॥ ૧૮॥

પુત્રીકૃતશઠારાતિશ્શઠજિદ્દૃણમોચકઃ ।
ભાષાદત્તહયગ્રીવો ભાષ્યકારો મહાયશાઃ ॥ ૧૯॥

પવિત્રીકૃતભૂભાગઃ કૂર્મનાથપ્રકાશકઃ ।
શ્રીવેઙ્કટાચલાધીશશઙ્ખચક્રપ્રદાયકઃ ॥ ૨૦॥

શ્રીવેઙ્કટેશશ્વશુરઃ શ્રીરમાસખદેશિકઃ ।
કૃપામાત્રપ્રસન્નાર્યો ગોપિકામોક્ષદાયકઃ ॥ ૨૧॥

સમીચીનાર્યસચ્છિષ્યસત્કૃતો વૈષ્ણવપ્રિયઃ ।
કૃમિકણ્ઠનૃપધ્વંસી સર્વમન્ત્રમહોદધિઃ ॥ ૨૨॥

અઙ્ગીકૃતાન્ધ્રપૂર્ણાર્યસ્સાલગ્રામપ્રતિષ્ઠિતઃ ।
શ્રીભક્તગ્રામપૂર્ણાઢ્ય વિષ્ણુવર્ધનરક્ષકઃ ॥ ૨૩॥ (શ્રીભક્તગ્રામપૂર્ણેશ)

બૌદ્ધધ્વાન્તસહસ્રાંશુઃશેષરૂપપ્રદર્શકઃ ।
નગરીકૃતવેદાદ્રિર્ઢિલ્લીશ્વરસમર્થિતઃ ॥ ૨૪॥ (દિલ્લીશ્વર)

નારાયણપ્રતિષ્ઠાતા સમ્પત્પુત્રવિમોચકઃ ।
સમ્પત્કુમારજનકઃ સાધુલોકશિખામણિઃ ॥ ૨૬॥

સુપ્રતિષ્ઠિતગોવિન્દરાજઃ પૂર્ણમનોરથઃ ।
ગોદાગ્રજો દિગ્વિજેતા ગોદાભીષ્ટપ્રપૂરકઃ ॥ ૨૬॥

સર્વસંશયવિચ્છેત્તા વિષ્ણુલોકપ્રદાયકઃ ।
અવ્યાહતમહદ્ધર્મા યતિરાજો જગદ્ગુરુઃ ॥ ૨૭॥

એવં રામાનુજાર્યસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વાન્કામાન્સમશ્નુતે ॥ ૨૮॥

યદાન્ધ્રપૂર્ણેન મહાત્મનેદં
    સ્તોત્રં કૃતં સર્વજનાવનાય ।
તજ્જીવભૂતં ભુવિ વૈષ્ણવાનાં
    બભૂવ રામાનુજમાત્તસાનામ્ ॥ ૨૯॥

ઇતિ શ્રીમદ્રામાનુજાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Mohan Chettoor

---

*Ramanuja Ashtottarashatanama Stotram*
pdf was typeset on June 7, 2022

Please send corrections to *sanskrit@cheerful.com*